# ICSE SEMESTER–I EXAMINATION

## SPECIMEN QUESTION PAPER

## SANSKRIT (SECOND LANGUAGE)

*Maximum Marks : 40*

*Time allowed : One and a half hour (inclusive of reading time)*

*The marks intended for questions are given in brackets [ ].*

*Four choices are given for each of the questions/incomplete statements. Choose the correct answer and put the tick mark(√) for the correct choice.*

### SECTION A (20 Marks)

*(Attempt all questions)*

**Question 1 — Comprehension**

**Read the following passage carefully and choose the correct answer and put the tick (√) mark.** **[10×1=10]**

संस्कृतं नाम दैवीवाक् इति महर्षिण: अबोधयन्। संस्कृतस्य सुरभारती गीर्वाणवाणी अमरभारती इत्यादीनि नामानि सन्ति। अस्यां भाषयां वैदिकं लौकिकं चेति विपुलां साहित्य परम्परां द्रष्टुं शक्नुम:। तत्र वेदोपनिषद: आत्म-ज्ञानं, काव्यरूपकादय: लौकिकज्ञानं च प्रसारयन्त: सन्ति।

संस्कृते दृश्यं श्रव्यञ्चेति काव्यं द्विविधम्। तत्र पुन: श्रव्यकाव्यं त्रिविधम्। गद्यं पद्यं चम्पू: इति। पादात्मक: छन्दोबद्ध: पदसमुदाय: पद्यम्। पादरहित: छन्दोरहितश्च पदसमुदाय: गद्यम्। तत्र गद्यपद्यमयं काव्यं चम्पू:। नाटकम् प्रकरणम् इति रूपकेऽपि दशविधम् भवति।

एतादृशीं संस्कृतभाषाम् प्राचीन नवीनकवय: समृद्धं रम्यं च कृतवन्त:।

**प्रश्ना** :-

1. संस्कृतभाषाम् एते समृद्धं कृतवन्त:।

   (A) ग्रन्था: (B) वेदा:

   (C) प्राचीन नवीनकवय: (D) मन्त्रा:

2. असौ दैवीवाक् इति प्रसिद्धम्।

   (A) संस्कृतम् (B) शास्त्रम्

   (C) काव्यम् (D) ज्ञानम्

3. वेदोपनिषदः एतं विषयं बोधयन्ति।

(A) देहस्य
(B) मरणस्य
(C) संसारस्य
(D) आत्मनः

4. काव्य प्रकारौ एतौ भवतः।

(A) महाकाव्य खण्डकाव्ये
(B) दृश्य श्रव्ये
(C) नाटक प्रकरणे
(D) उपमा रूपके

5. गद्यपद्यमयं काव्यम् एवं कथ्यते।

(A) स्तोत्रम्
(B) सुभाषितम्
(C) चम्पूः
(D) गद्यम्

6. गद्य काव्यम् एवं भवति।

(A) पादसहितः
(B) छन्दोबद्धः
(C) अर्थरहितः
(D) अर्थसहितः

7. रूपकेषु एतावन्तः प्रकाराः वर्तन्ते।

(A) चतुर्दश
(B) दश
(C) षोडश
(D) पञ्च

8. गद्यं पद्यं चम्पूः एतादृशः काव्यविधः अस्ति।

(A) श्रव्यस्य
(B) नाटकस्य
(C) दृश्यस्य
(D) रूपकस्य

9. अस्य नामान्तरम् अमरभारती भवति।

(A) संस्कृतस्य
(B) देवस्य
(C) श्लोकस्य
(D) अमरकोषस्य

10. अबोधयन् इत्यत्र राषः लकारः विद्यते।

(A) लट्
(B) लृट्
(C) लङ्
(D) लोट्

**Question 2 — Grammar**

**Read the following questions carefully and choose the correct answer and put the tick (√) mark.** **[10×1=10]**

1. त्वं सत्कार्यं ................ ।

   (A) करोषि  (B) करोति

   (C) करोमि  (D) कुरुथ

2. यूयं चित्रकाराः ................ ।

   (A) स्थ  (B) स्तः

   (C) स्थः  (D) सन्ति

3. अस् धातुः - लङ् - लकार - मध्यम एकवचनम् ................ ।

   (A) असि  (B) आसीः

   (C) अस्मि  (D) आस्त

4. ................ स्वस्ति।

   (A) प्रजेभ्यः  (B) प्रजाभ्यः

   (C) प्रजासु  (D) प्रजाः

5. ................ नाम सर्वे स्वराः।

   (A) हल्  (B) अच्

   (C) जश्  (D) ऊष्माण

6. <u>च</u> वर्गस्य उत्पत्तिस्थानम् ................ ।

   (A) कण्ठः  (B) मूर्धा

   (C) तालुः  (D) ओष्ठौ

7. ................ कदलीफलं रोचते।

   (A) कपिम्  (B) कपये

   (C) कपेः  (D) कपौ

8. ................ आज्ञां प्रजा: पालयेयु:।

(A) राजस्य
(B) राज्ञ:
(C) राज्ञे
(D) राजा

9. खल्विदम् विभजनम् ................।

(A) खलु + इदम्
(B) खल + विदम्
(C) खलु + विदम्
(D) खल + इदम्

10. नदीषु गङ्गा ................।

(A) पवित्रतरा
(B) पवित्रतमा
(C) पवित्रतम:
(D) पवित्रतमा:

## SECTION B (20 Marks)

*(Attempt all questions)*

*Questions from only two of the following textbooks are to be answered.*

**(Samskruta Vaani 4)**

### Question 3 — Literature

**Read the following questions carefully and choose the correct answer and put the tick (√) mark.** **[10×1=10]**

1. वैदिकवाङ्मयस्य सारभूतो भाग: ................।

(A) वेदा:
(B) मन्त्रा:
(C) उपनिषत्
(D) पुराणानि

2. इदं जगत् ................ व्याप्तमस्ति।

(A) केन
(B) ईशेन
(C) नृपेण
(D) सेवकेन

3. नरः कर्म कुर्वन्नेव ................ वर्षाणि जीवेत्।

(A) षष्टि
(B) पञ्चाशत्
(C) शतम्
(D) विंशतिः

4. कविकुलगुरुः ................ ।

(A) भारविः
(B) बाणः
(C) कालिदासः
(D) वेदव्यासः

5. खण्डकाव्यम् ................ ।

(A) मेघदूतः
(B) रघुवंशः
(C) मालविकाग्निमित्रम्
(D) कुमरसंभवः

6. कालिदासस्य कृतिः न ................ ।

(A) विक्रमोर्वशीयम्
(B) मेघदूतः
(C) रामायणम्
(D) रघुवंशः

7. ................ भारतस्य प्राचीनं नाम।

(A) हिन्दुस्थानम्
(B) भारतम्
(C) आर्यावर्तः
(D) भारतवर्षम्

8. सागरः भारतमातुः ................ सततं प्रक्षालयति।

(A) करौ
(B) पदौ
(C) कपोलौ
(D) चरणौ

9. भारतस्य ................ हिमालयः अस्ति।

(A) पश्चिमे
(B) पूर्वे
(C) दक्षिणे
(D) उत्तरे

10. ................ भारतस्य रमणीयतां वर्धयन्ति।

(A) तिथयः
(B) ऋतवः
(C) मासाः
(D) सप्ताहाः

**Question 4 — Literature**

**Read the following questions carefully and choose the correct answer and put the tick (√) mark.** **[10×1=10]**

1. भारते ................ अतीव महत्त्वम् अस्ति।

   (A) दुर्जनानां (B) गुरुणाम्

   (C) सौन्दर्याणाम् (D) दरिद्राणाम्

2. गुरुः मुग्धेषु छात्रेषु ................ वपति।

   (A) अल्पगुणान् (B) संकुचितगुणान्

   (C) सद्गुणान् (D) दुर्गुणान्

3. ................ सम्मानः अस्माभिः करणीयः।

   (A) पीडकस्य (B) छात्रस्य

   (C) आचार्यस्य (D) असंतुष्टस्य

4. हरिशर्मा ................ भूसुरः आसीत्।

   (A) धनिकः (B) कृशः

   (C) निर्धनः (D) सुन्दरः

5. जामातृवाहनं ................।

   (A) गजः (B) तुरगः

   (C) अजः (D) वृषभः

6. चोरितं धनं ................ वृक्षस्य अधः आसीत्।

   (A) अश्वत्थ (B) नारिकेल

   (C) आम्र (D) दाडिम

7. सत्सङ्गतिः ................ अपाकरोति।

(A) पापम्
(B) पुण्यम्
(C) धनम्
(D) सन्तोषम्

8. त्यागेन शीलेन गुणेन कर्मणा ................ परीक्ष्यते।

(A) गुरुः
(B) देवः
(C) प्राणिः
(D) पुरुषः

9. सर्वे गुणाः ................ आश्रयन्ति।

(A) शीलम्
(B) मानवम्
(C) धनम्
(D) गुणम्

10. मानवस्य श्रेष्ठं भूषणं ................।

(A) स्नानम्
(B) हाराः
(C) वाक्
(D) विलेपनम्